[illegible] क्र.नं.२७

अराधन सयोग

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

॥ अथ आराधनाप्रारंभः ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(२)

॥ श्रीगणेशायनमः॥ अथगुर्वाद्या
ह्रेत्रयोदशाह्वा यथाचारमाराध
नं तत्रादौ प्रयोगः॥ ॥गुरुचतुष्ट
स्य केशवादीनांच प्रत्येकमेकैकद्
स्यैवं षोडश ब्राह्मणपक्ष मभिप्रेता
च्यते॥ प्रातर्होमानंतरं स्नात्वीभू
तस्य गुरोः समाराधने गुर्वर्थे भ
वद्भिः क्षणः क्रियतां॥ एवं परम १
गुर्वर्थे परमेष्ठीगुर्वर्थे परात्पर
गुर्वर्थे यद्वा विश्वरूपधराचार्यार्थे
वा नंतो गुरुत्रयमिति वा चतुरोब्रा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

क्षणाग्निमंत्रस्य ततः कृष्णार्थे भ०॥ कृ
ष्णसंकर्षणार्थे इति संकल्प्य द्वादश विप्रान् नि
मंत्र्य मध्याह्ने शालग्रामनाहूय कृतोक्षु
चिराचम्य पवित्रपाणिः प्राणानायम्य
देशकालौ संकीर्त्य भूतीभूतस्य
गुरोः समाराधनं करिष्य इति संक
ल्प्य ॥ तत्र गंधाक्षतैः तुलसीकर्पूरमि
श्रजलेन चरणात्क्रमेण तेषां पादप्रक्षा
लनं कृत्वा तानाचम्य स्वयंचाचम्य पा
दप्रक्षालनोदकं पात्रांतरे गृहीत्वा त
स्योदीसाक्षतगंधपुष्पतुलसीदलैर

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

भ्यर्च्य ॥ आनंदमानंदकरं प्रसन्नं ज्ञा
नस्वरूपं निजबोधरूपं ॥ योगींद्रमी
ड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं
नमामि ॥ इति नमस्कुर्यात् ॥ एवं सर्वेषां
रूच्चा गंधादिभिस्तत्पात्रमलंकृत्य देवसं
२ निधौ स्थापयेत् ॥ कुशासने बुभ्राक्षु २
रवडुपवेश्य पुरुषसूक्तेन गंधस्यार्चं ॥ ॐ
नमो नारायणायेति मंत्रसहितेनावा
हनादिषोडशोपचारैः पुरुषानुसम
येनाभ्यर्चयेत् ॥ यद्वा पंचोपचारपू
जा कार्या ॥ ततः सर्वेषु पात्रेषु पायसो

(3A)

दिविशिष्टद्रव्यं साज्यं व्यंजनसहितं च
पारिविष्यगायत्र्या प्रोक्ष्य गुरुर्वेदमन्त्रं
पारिविष्टं पारिवेक्ष्यमाणं चान्नेऽस्मै स्वाहा
हव्यं न मम॥ एवं सर्वेभ्यो न्नस्याग्रं कृत्वा
ॐ तद्ब्रह्म। ॐ तद्वायुः। ॐ तदात्मा। ॐ
तत्सत्यं। ॐ तत्सर्वं। ॐ तत्पुरोर्नमः॥
अंतश्चरति भूतेषु गुहायां विश्वमूर्ति
षु॥ त्वं यज्ञस्त्वं वषट्कारस्त्वमिं
द्रस्त्वं रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्र
जापतिः॥ त्वं तदाप आपो ज्योती र
सोमृतं ब्रह्म भूर्भुवः सुवरोम्॥ ब्रह्मा

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai"

(५)

पेणं ब्रह्महविस्रा द्विजपित्वा उत्तरा
पोढ्ड्ग नातार माचीं तेषु उपविष्टेषु वि
शिष्टतांबूलदक्षिणा वस्त्रादिभिर
भ्यर्च्य उपविष्टेन तेषु सुवासिधर्मा
गभूतं तीर्थप्रजनं करिष्ये ॥ इति सं
३ कल्प्य ॥ चतुरस्रं मंडलं गोमयेनाप ३
लिप्य तत्रं रंगावल्यादिभिरलंकृत्य
तन्मंडले धान्योपरि पाद्योदककलशं
संस्थाप्य तत्र गंगादि सर्वतीर्था
नि भावयित्वा ॥ पुरुषसूक्तेन प्रत्यृचं
तीर्थराजाय नमः इत्यंतेन षोडशोपचा
रैरभ्यर्च्य तत्सार्वं शिरसि धृत्वा ॥

" Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(५A)

श्लोकः सरस्वत्येत्यनुवा
कश्रेषं भीषास्माद्वातः प
वत इत्यनुवाकं जपित्वा ॥
भीषास्माद्वातः पवते ॥ भी
षोदेति सूर्यः ॥ भीषास्मा
दग्निश्चेंद्रश्च ॥ मृत्युर्धाव
तिपंचम इति ॥ सेषानंद

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

स्यभीमा० साभवति ॥ युवा स्यात्साधुयु
वाध्यायकः ॥ आशिष्ठो दृढिष्ठो बलिष्ठः ॥
तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्या
त् ॥ स एको मानुष आनंदः ॥ ते ये शतं
मानुषा आनंदाः ॥ स एको मनुष्यगं
धर्वाणामानंदः ॥ श्रोत्रियस्य चाका
महतस्य ॥ ते ये शतं देवगंधर्वाणा
मानंदाः ॥ स एकः पितॄणां चिरलो ४
कलोकानामानंदः ॥ श्रोत्रि० ॥ ते ये
शतं पितॄणां चिरलोकलोकानामा

(5A)

नंदां॥सएकआजानजानांदेवानामा
नंदः॥श्रोत्रि०॥तेयेशतमाजानजा
नांदेवानामानंदाः॥सएकःकर्मदे
वानांदेवानामानंदाः॥येकर्मणादेवा
नपियंति॥श्रोत्रियस्य०॥तेयेशतंक
र्मदेवानांदेवानामानंदाः॥सएकोदे
वानामानंदः॥श्रोत्रियस्य०॥तेयेश
तंदेवानामानंदाः॥सएकइंद्रस्यानं
दः॥श्रोत्रियस्य०॥तेयेशतमिंद्रस्या
नंदाः॥सएकोबृहस्पतेरानंदः॥श्रो

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6)

त्रियस्य॰॥तेयेशतंबृहस्पतेरानंदाः॥
सएकःप्रजापतेरानंदः॥श्रोत्रियस्य॰॥
तेयेशतंप्रजापतेरानंदाः॥सएको
ब्रह्मणआनंदः॥श्रोत्रियस्य॰॥सयश्चा
यंपुरुषे।यश्चासावादित्ये॥सएकः
॥सयएवंवित्॥अस्माल्लोकात्प्रेत्य॥
मय एतमन्नमात्मानमुपसंक्रामति॥
एतंप्राणमयमात्मानमुपसंक्रामति ५
॥एतंमनोमयमात्मानमुपसंक्रामति॥
एतंमैविज्ञानमयमात्मानमुपसंक्रा

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

मति ॥ एतमानंदमयमात्मानमुपसं
क्रामति ॥ तदप्येष श्लोको भवति ॥२
ॐ सहस्रशीर्षं देवमित्यनुवाकं जपि
त्वा ॥ नारायणं महाज्ञेयं विश्वात्मानं
परायणं ॥ नारायणपरो ज्योतिरात्मा
नारायणः परः ॥ नारायणं परं ब्रह्म
तत्त्वं नारायणः परः ॥ नारायणप
रो ध्याता ध्याता नारायणः परः ॥ य
च्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि
वा ॥ अंतर्बहिश्च तत्सर्वं व्याप्य ना
रायणः स्थितः ॥ अनंतमव्ययं क

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(७)

बिंदुसमुद्रेतं विश्वशंभुवं॥ पद्मको
शप्रतीकाशंहृदयंचाप्यधोमुखं॥
अधो निष्ट्यावितस्त्यां तेनाभ्यामुप
रितिष्टति॥ ज्वालमालाकुलंभाती
विश्वस्यायतनंमहत्॥ संततंशि
लाभिस्तुलंबत्याकोशसन्निभं॥त
स्यांतेसुषिरंसूक्ष्मंतस्मिंत्सर्वंप्र
तिष्टितं॥ तस्यमध्येमहानग्निर्वि
श्वार्चिर्विश्वतोमुखः॥ सोग्रभुग्वि
भजंतिष्टंनाहारमजरःकविः॥ ति
र्यगूर्ध्वमधःशायीसरश्मयतस्यसं

६

(7A)

तता॥संतापयंतिस्वंदेहमापादतल
मस्तगः॥तस्यमध्येवह्निशिखाअ
णीयोर्ध्वाव्यवस्थितः॥नीलतोयद
मध्यस्था॥विद्युल्लेखेवभास्वरा॥नी
वारशूकवत्तन्वीपीताभास्वत्यणूप
मा॥तस्याःशिखायामध्येपरमात्मा
व्यवस्थितः॥सब्रह्मसशिवःसहरिः
सेंद्रःसोक्षरःपरमस्वराट्॥हरि
कीर्त्तनपुरःसरंसहषेनृत्यंकृत्वा
तस्मात्तपुनर्मंडलेसंस्थाप्यचंदना
क्षतपुष्पाणिपूजाशिष्टानिबंधुभिः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(४)

सहधर्मत्वाविप्रान्प्रदक्षणीकृत्य॥आ
नंदमानंद०॥गुरुर्ब्रह्मा०॥इत्यादिमं
त्रैर्हि आस्तीर्थराजंच नमस्कृत्य गुर्व
र्थे विप्रहस्ते पादोदकपात्रं दत्वा त
दाज्ञया तत्तीर्थं मंत्रेण गृह्णीयात्॥
तत्र मंत्रः॥ अविद्यामूलनाशनं सर्व
पापप्रणाशनं॥गुरोः पादोदकं चि
त्र संसारद्रुमनाशनं॥पुत्रान्तुं का
मनया तु शोषणं पावकं कस्य दीप
नं ज्ञानं तेजसः॥गुरुपादोदकं चि
त्रं पुत्रपौत्रप्रवर्धनमिति गृह्णीयात्॥

दि

(५

(8A)

तास्पुनः प्रणम्य। तान् अन्यांश्च दक्षि
णादिभिः तोषयित्वा सन्मानपुरःस
रं ताननुव्रज्य कर्मेश्वरार्पणं कुर्यात्॥
सुहृद्युक्तो भुंजीत॥ ततः श्राद्धदर्शम
हालयतीर्थप्रयुक्तादि श्राद्धानि कु
र्यात्॥ प्रतिमासमेव मासाधनं प्रत्य
ब्दं श्रावणोत्तरं मासाधनं चैवमेव इत्थं
करणाशक्तौ यथाशक्ति प्रयतीन् य
थाशक्ति ब्राह्मणानाहूय पादप्रक्षा
लपूर्वकं गंधादिभिरभ्यर्च्य भोजयेदि

"soft project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(९)

द्दिनि॥ ॥इतिनारायणगंडानुसार्थी
चाराष्तुग्रहीतआराधनप्रयोगःसमा
प्तः॥ ॥ॐ नहूलोयनुवाकं॥ ॥
अथपुरुषोहवैनारायणोकामयत॥
प्रजाःसृजेयेति॥नारायणाब्रह्मणो
जायते॥मनःसर्वेंद्रियाणिच॥खंवा
युर्ज्योतिरापःपृथवीविश्वस्यधारिणि॥
नारायणाद्ब्रह्माजायते॥नारायणाद्वि
ष्णुर्जायते॥नारायणाद्रुद्रोजायते॥
नारायणादिंद्रोजायते॥नारायणा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(9A)

नारायणात्प्रजापतिर्जायंते॥नारा
यणा॥द्वादशादित्याः॥रुद्रावसवःस
र्वाणिछंदांसि॥नारायणादेवसमु
त्पद्यंते॥नारायणात्प्रवर्त्तते॥नाराय
णात्प्रलीयंते॥नारायणात्प्ररोहंते॥
अथपुरुषोहवैनारायणः॥ब्रह्मा
नारायणः॥शिवश्चनारायणः॥
शक्रश्चनारायणः॥कालश्चनारा
यणः॥दिशश्चनारायणः॥ऊर्ध्वंच
ना०॥अधश्चनारा०॥अंतर्बहिश्च
ना०॥नारायणायएवंवेदं सर्वं॥य

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10)

भूतंयच्चभव्यं॥ निष्कलंकोनिरंजनो
निर्विकल्पोनिराख्यातःशुद्धदेवए
कोनारायणः॥नद्वितीयोस्ति॥कश्चि
द्यएवंवेद॥सविष्णुरेवभवति॥ॐ
मित्यग्रेव्याहरेत्॥नमइतिपश्चात्॥ना
रायणेत्युपरिष्टात्॥ॐमित्येकाक्षरं॥
नमइतिद्वेअक्षरे॥नारायणायेति
पंचाक्षराणि॥एतद्वैनारायणस्या
ष्टाक्षरंपदं॥योवैनारायणस्याष्टा
क्षरंपदमध्येति॥अनुपब्रवःसर्वमा

(10A)

पुरेति॥ विंदते प्राजापत्यं॥ रायस्पोषं
गौपत्यं॥ तलोमत्वमश्नुते तलोमत्व
त्वमश्नुतइति॥ सत्यगानंदपर
ब्रह्मपुरुषप्रणवस्वरूपं॥ अकार
उकारमकारयेति॥ तानेकधास
मभरत्तदेतद्वोमिति॥ इसमुत्लामु
च्यतेयागिजन्मसंसारबंधनात्॥
ॐ नमोनारायणायेति मंत्रोपासकः॥
वैकुंठभुवनलोकं गमिष्यति॥ वैकुं
ठभुवनलोकं गच्छति॥ तदिदंपुरं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

पुरंपुंडरीकं विज्ञानघनं ॥ तस्मात्त
डिद्युद्वभासं ॥ ब्रह्मण्यो देवकीपुत्रो
ब्रह्मण्यो मधुसूदनो ॥ सर्वभूतस्थ
मेकं वै नारायणः ॥ कारणपुरूषम
१० कारं परब्रह्म ॥ ओं ॥ एतदथर्वशि
रोधीयते ॥ स ब्रह्मभूयाय कल्प
ते । स सर्वतः सर्वमेधते । स पंच ४०
महापापात्समुच्यते । सायमधीया
नो दिवसकृतं पापं नाशयति । प्रा

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(11A)

तरधीयानो रात्रिकृतं पापं ना
शयति। सायंप्रातरधीयानो अ
पापो भवति। मध्यंदिनमादित्या
भिमुखोधीयानः। पंचमहापा
तकोपपातकेभ्यो मुच्यते। सर्व
वेदपारायणपुण्यं भवति॥ श्री
नारायणसायुज्यमवाप्नोति। श्री
मन्नारायणसायुज्यमाप्नोति।
यएवंवेद। इत्युपनिषत्। सह

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(12)

नाववतु ॥ सहनौभुनक्तु ॥ स
ह ॥ वीर्यं करवावहै ॥ तेजस्विनाव
धितमस्तु मा विद्विषावहै ॥ ॐ
शांतिः शांतिः शांतिः ॥१॥ ॥
हे हस्ताक्षर [illegible] थो [illegible] स्कृत रघुना
११ थ दंडापुर [illegible] लिखितं ॥ [illegible] ११
अनेन गीयतां दोवोभग वांह्मक्सा
पतिः ॥ मार्तंड पूर्वेषामस्माकं कुलदेवतं ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(12A)

अथब्रह्मचारिव्रतलोपप्रायश्चित्तं। देशकालौ सं
कीर्त्य० ममशौचाचमनसंध्यावंदनदर्भभिक्षा
ग्निकार्यशास्त्रियशूद्रादिस्पर्शनकौपीनकटिसू
त्रयज्ञोपवीतमेखलादंडाजिनत्याग दिवास्वापे
छत्रधारणपादुकाभ्यांगदर्पणमालाधारणाद्दू
तैनअनुलेपनांजन मल्लक्रीडाद्युक्तनृत्यगीत
वाद्याद्यभिरतिपारुषद्रोहादिसंभाषणपर्युषित
भोजनादिसर्वब्रह्मचर्यनियमलोपप्रत्यवा
यपरिहारद्वाराश्री० महाव्याहृतिहोमपूर्वकं
कृच्छ्रत्रयमाचरिष्ये। तथाचममहानाम्न्यादिव्रत
चतुष्टयलोपप्रत्यवायपरिहारद्वाराश्रीपरमे० होमपूर्व
कंप्रत्येकंएकैकंप्राजापत्यंहिरण्यप्रत्याम्नायेनयथाश
क्तिमाचरिष्ये।। लौकिकाग्निंप्रतिष्ठाप्य। ध्यु सा क्रियमाण
व्रतलोपप्रायश्चित्तहोमदेवतापरिग्रहार्थमन्वाधानंक
रिष्ये।। स्थंडिलादिके० अग्निंप्रतिष्ठाप्य।। ध्यातो। क्रियमाणमा
हान्म्यादिव्रतलोपप्रायश्चित्तहोमदे० अस्मिन्नन्वाहितेऽग्नौ० चक्षुषीआ

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

ज्येन अन्वप्रधानं आहुतीनां अग्निं वायुं सूर्यं प्रजापतिं। अग्निं
पृथिवी महांतं १ वायुमंतरिक्षं महांतं। २। आदित्यं द्यां म
हांतं ३। चंद्रमसं नक्षत्राणि दिशा महांतं। ४। अग्निं विश्व
वेदसं। ५ विभावसुं शतक्रतुं ६। द्विरग्निं ७। अग्निं वायुं सूर्यं
प्रजापतिं। १२ एता प्रधानदेवताः आज्येन। पुनरन्वप्रधा
नं सवितारं अष्टाविंशत्या वा विंशति अष्टौ वा॥ संख्या गाय
त्या आज्येन॥ शेषेण त्याचा रांत ... चा॥ ॐ भूः स्वाहा।
अग्नय०। भुवः स्वाहा वायव०। स्वः स्वाहा। सूर्या० ॐ भूर्भु
वः स्वः स्वाहा प्रजा०। ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा।
अग्नये पृथिवी महत इदं। ॐ भुवो वायवे चांतरिक्षाय च
महते च स्वाहा। वायुमंतरिक्ष महत इ०। ॐ स्वरादित्या
य दिवे च महते च स्वाहा। आदित्याय दिवे च महत इ०। ॐ
भूर्भुवः स्वश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते
च स्वाहा। चंद्रमसे नक्षत्रेभ्यो दि...पश्च महत इदं०॥ ८॥
ॐ पाहि नो अग्न एनसे स्वाहा। अग्नय०। ९ ॐ पाहि नो वि
श्ववेदसे स्वाहा। विश्ववेदस इ० १०। ॐ यज्ञं पाहि विभा
वसो स्वाहा॥ विभावस व इ०। ११। ॐ सर्वं पाहि शतक्रतो
स्वाहा। शतक्रतव इ० १२। ॐ पुनरूर्जा निवर्तस्व पुनरग्न

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(13)

इहायुषा ॥ पुनर्नः पाह्यंहसः स्वाहा। अग्नय०।१३।ॐ
सहरय्या निवर्त्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्न्या
विश्वतस्परि स्वाहा ॥ अग्नय०।१४।ॐ भूः स्वाहा। अग्न०
ॐ भुवः स्वाहा। वायव०। ॐ स्वः स्वाहा। सूर्याये०।ॐ भूर्भुवः स्वः
स्वाहा प्रजापतय०।१५। इति हुत्वा। पुनः गायत्री मंत्रेण
प्रत्येकं अष्टाविंशति ज्येष्ठो वा संख्या हुत्वा ॥ शेषेण स्वि
ष्टकृतादि होमशेषं समाप्य ॥ एतत् अल्पधर्मे लोपप्राय
श्चित्तं। बहुधर्मे लोपतु प्रा०। वे वोपियाजपेन्मंत्रं लक्षं
चैवे च शिवालये। ब्रह्मचारि स्वधर्मेच न्यूने चेत् सर्वमेव न तु॥
इति ब्रह्मचारी व्रत लोपप्रायश्चित्तं॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com